# २०२१-२२
# शास्त्री-परीक्षा
# खण्डः–तृतीयः, अधिसत्रम्–प्रथमम्
# विषयः- अनिवार्यसंस्कृतम्, पत्रम्- द्वितीयम्

---

**समयः - ३½ होराः** **सम्पूर्णाङ्कः – ७०**

**निर्देशः – एकस्यां पंक्तौ दश शब्दाः प्रतिपृष्ठं च अष्टौ पंक्तयो लेख्याः ।**

**१. केचन पञ्च समाधेयाः -** **१०**

**क.** कति वेदाङ्गानि? कानि च तानि?

**ख.** गोपथब्राह्मणं केन वेदेन सम्बद्धम्?

**ग.** तैत्तिरीयब्राह्मणं केन वेदेन सम्बद्धम्?

**घ.** छान्दोग्योपनिषत् केन वेदेन सम्बद्धा?

**ङ.** रामायणे कति काण्डानि? कानि च तानि?

**च.** विष्णुशर्मणः का नीतिकथाकृतिः?

**छ.** हितोपदेशस्य रचनाकारः कः?

**ज.** महाभारते कति पर्वाणि?

**झ.** पञ्चतन्त्रे कानि कानि तन्त्राणि?

**२.रामायणस्य विषयवर्णनं कुरुत।**

**१५ अथवा**

**पञ्चतन्त्रमहत्त्वं प्रतिपादयत।**

**३.जातकमालायाः परिचयं लिखत।**

**१०**

**अथवा**

**महाभारतस्य महत्त्वं विवेचयत।**

**४. अधोलिखितेषु कस्यापि रूपद्वयस्य सूत्रनिर्देशपूर्वकं सिद्धिं विलिखत- १०**

**क.** भूतपूर्वः।

**ख.** हरित्रातः।

**ग.** चोरभयम्।

**घ.** सुमद्रम्।

**५.कयोश्चिद् द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या- १०**

**क.** अव्ययीभावे चाकाले।

**ख.** तृतीया तत्कृतार्थेन गुणवचनेन।

ग. षष्ठी।

घ. झयः।

**६. सूत्रनिर्दशपूर्वकं द्वयोः पदयोः सिद्धिं विलिखत। ८**

क. अजा।

ख. कुमारी।

ग. त्रिलोकी।

घ. गोपी

**७. अधोलिखितेषु सूत्रेषु द्वयोः सोदाहरणं व्याख्या विधेया- ७**

क. उगितश्च।

ख. बह्वादिभ्यश्च।

ग. षिद्गौरादिभ्यश्च।

घ. क्रीतात् करणपूर्वात्।

************************************